# ॥ पादारविन्द शतकम् ॥

महिम्नः पन्थानं मदन परिपन्थि प्रणयिनि
प्रभुर्निर्णेतुं ते भवति यतमानोऽपि कतमः ।
तथापि श्रीकाञ्ची विहृति रसिके कोऽपि मनसो
विपाकस्त्वत्पाद स्तुति विधिषु जल्पाकयति माम् ॥ १॥

गलग्राही पौरन्दर पुरवनी पल्लव रुचां
धृत प्राथम्यानां अरुण महसा मादिम गुरुः ।
समिन्धे बन्धूक स्तबक सहयुध्वा दिशि दिशि
प्रसर्पन्कामाक्ष्याः चरण किरणाना मरुणिमा ॥ २॥

मरालीनां याना-भ्यसन कलना मूल गुरवे
दरिद्राणां त्राण व्यतिकर सुरोद्यान तरवे ।
तमस्काण्ड प्रौढि प्रकटन तिरस्कार पटवे
जनोऽयं कामाक्ष्याः चरण नलिनाय स्पृहयते ॥ ३॥

वहन्ती सैन्दूरीं सरणिमव नम्रामर पुरी-
पुरन्ध्री सीमन्ते कवि कमल बालार्क सुषमा ।
त्रयी सीमन्तिन्याः स्तनतट निचोलारुण पटी
विभान्ती कामाक्ष्याः पदनलिन कान्ति र्विजयते ॥ ४॥

प्रणम्री भूतस्य प्रणय कलह त्रस्त मनसः
स्मराराते श्चूडा वियति गृहमेधी हिमकरः ।
ययोः सान्ध्यां कान्तिं वहति सुषमाभि श्चरणयोः
तयोर्मे कामाक्ष्या हृदय मपतन्द्रं विहरताम् ॥ ५॥

ययोः पीठायन्ते विबुध मुकुटीनां पटलिका
ययोः सौधायन्ते स्वय मुदय भाजो भणितयः ।
ययोः दासायन्ते सरसिज भवाद्या श्चरणयोः
तयोर्मे कामाक्ष्या दिनमनु वरीवर्तु हृदयम् ॥ ६॥

नयन्ती संकोचं सरसिज रुचं दिक्परिसरे
सृजन्ती लौहित्यं नखकिरण चन्द्रार्ध खचिता ।
कवीन्द्राणां हृत्कैरव विकस नोद्योग जननी
स्फुरन्ती कामाक्ष्याः चरण रुचि सन्ध्या विजयते ॥ ७॥

विरावै र्मञ्जीरैः किमपि कथयन्तीव मधुरं
पुरस्ता दानम्रे पुरविजयिनि स्मेर वदने ।
वयस्येव प्रौढा शिथिलयति या प्रेम कलह-
प्ररोहं कामाक्ष्याः चरण युगली सा विजयते ॥ ८॥

सुपर्व स्त्री लोलालक परिचितं षट्पद कुलैः
स्फुरल्लाक्षा रागं तरुण तरणिज्योति ररुणैः ।

भृतं कान्त्यम्भोभिः विसृमर मरन्दैः सरसिजैः
विधत्ते कामाक्ष्याः चरण युगलं बन्धु पदवीम् ॥ ९॥

रजःसंसर्गेऽपि स्थितम रजसा मेव हृदये
परं रक्तत्वेन स्थित मपि विरक्तैक शरणम् ।
अलभ्यं मन्दानां दधदपि सदा मन्द गतितां
विधत्ते कामाक्ष्याः चरणयुग माश्चर्य लहरीम् ॥ १०॥

जटाला मञ्जीर स्फुर दरुण रत्नांशु निकरैः
निषिदन्ती मध्ये नखरुचि झरी गाङ्ग पयसाम् ।
जगत्त्राणं कर्तुं जननि मम कामाक्षि नियतं
तपश्चर्यां धत्ते तव चरण पाथोज युगली ॥ ११॥

तुलाकोटि द्वन्द्वक्कणित भणिता भीति वचसोः
विनम्रं कामाक्षी विसृमर महः पाटलि तयोः ।
क्षणं विन्यासेन क्षपित तमसोर्मे ललितयोः
पुनीयान्मूर्धानं पुरहर पुरन्ध्री चरणयोः ॥ १२॥

भवानि द्रुह्येतां भव निबिडितेभ्यो मम मुहुः
तमो व्यामोहेभ्य स्तव जननि कामाक्षि चरणौ ।
ययो र्लाक्षा बिन्दु स्फुरण धरणाद् धूर्जटिजटा-
कुटीरा शोणाङ्कं वहति वपुरेणाङ्क कलिका ॥ १३॥

पवित्री कुर्युर्नुः पदतल भुवः पाटल रुचः
परागास्ते पाप प्रशमन धुरीणाः परशिवे ।
कणं लब्धुं येषां निज शिरसि कामाक्षि विवशा
वलन्तो व्यातन्वन्ति अहमहमिकां माधव मुखाः ॥ १४॥

बला कामालाभिः नखरुचिमयीभिः परिवृते
विनम्र स्वर्नारी विकच कच कालाम्बुद कुले ।
स्फुरन्तः कामाक्षि स्फुट दलित बन्धूक सुहृदः
तटिल्लेखायन्ते तव चरण पाथोज किरणाः ॥ १५॥

सरागः सद्वेषः प्रसृमर सरोजे प्रतिदिनं
निसर्गा दाक्रामन् विबुध जन मूर्धान मधिकम् ।
कथंकारं मातः कथय पदपद्म स्तव सतां
नतानां कामाक्षि प्रकटयति कैवल्य सरणिम् ॥ १६॥

जपा लक्ष्मी शोणो जनित परमज्ञान नलिनी-
विकास व्यासङ्गो विफलित जगज्जाड्य गरिमा ।
मनःपूर्वाद्रिं मे तिलकयतु कामाक्षि तरसा
तमस्काण्ड द्रोही तव चरण पाथोज रमणः ॥ १७॥

नमस्कुर्मः प्रेङ्खन् मणिकटक नीलोत्पल महः-
पयोधौ रिङ्खद्भिः नखकिरण फेनै र्धवलिते ।

स्फुटं कुर्वाणाय प्रबल चलदौ र्वानल शिखा-
वितर्कं कामाक्ष्याः सतत मरुणिम्ने चरणयोः ॥ १८॥

शिवे पाशायेतां अलघुनि तमः कूप कुहरे
दिनाधीशायेतां मम हृदय पाथोज विपिने ।
नभो मासायेतां सरस कविता रीति सरिति
त्वदीयौ कामाक्षि प्रसृत किरणौ देवि चरणौ ॥ १९॥

निषक्तं श्रुत्यन्ते नयन मिव सद्वृत्त रुचिरैः
समैर्जुष्टं शुद्धैः अधरमिव रम्यै र्द्विजगणैः ।
शिवे वक्षोजन्म द्वितय मिव मुक्ताश्रित मुमे
त्वदीयं कामाक्षि प्रणत शरणं नौमि चरणम् ॥ २०॥

नमस्या संसज्जन् नमुचि परिपन्थि प्रणयिनी-
निसर्ग प्रेङ्खोलत् कुरलकुल कालाहि शबले ।
नखच्छाया दुग्धोदधि पयसि ते वैद्रुम रुचां
प्रचारं कामाक्षि प्रचुरयति पादाब्ज सुषमा ॥ २१॥

कदा दूरीकर्तुं कटुदुरित काकोल जनितं
महान्तं सन्तापं मदन परिपन्थि प्रियतमे ।
क्षणात्ते कामाक्षि त्रिभुवन परीताप हरणे
पटीयांसं लप्स्ये पदकमल सेवामृतरसम् ॥ २२॥

ययोः सान्ध्यं रोचिः सतत मरुणिम्ने स्पृहयते
ययोश्चान्द्री कान्तिः परिपतति दृष्ट्वा नखरुचिम् ।
ययोः पाकोद्रेकं पिपठिषति भक्त्या किसलयं
म्रदिम्नः कामाक्ष्या मनसि चरणौ तौ तनुमहे ॥ २३॥

जगन्नेदं नेदं परमिति परित्यज्य यतिभिः
कुशाग्रीय स्वान्तैः कुशल धिषणैः शास्त्र सरणौ ।
गवेष्यं कामाक्षि ध्रुव मकृतकानां गिरिसुते
गिरा मैदम्पर्यं तव चरण पद्मं विजयते ॥ २४॥

कृतस्नानं शास्त्रा मृत सरसि कामाक्षि नितरां
दधानं वैशद्यं कलितरस मानन्द सुधया ।
अलंकारं भूमेः मुनिजन मनश्चिन्मय महा-
पयोधे रन्तस्स्थं तव चरण रत्नं मृगयते ॥ २५॥

मनोगेहे मोहोद्भव तिमिर पूर्णे मम मुहुः
दरिद्राणी कुर्वन् दिनकर सहस्राणि किरणैः ।
विधत्तां कामाक्षि प्रसृमर तमो वञ्चन चणः
क्षणार्धं सान्निध्यं चरण मणिदीपो जननि ते ॥ २६॥

कवीनां चेतोवन् नखर रुचि सम्पर्कि विबुध-
स्रवन्ती स्रोतोवत् पटुमुखरितं हंसकरवैः ।

दिनारम्भ श्रीवन् नियत मरुणच्छाय सुभगं
मदन्तः कामाक्ष्याः स्फुरतु पद पङ्केरुह युगम् ॥ २७॥

सदा किं सम्पर्कात् प्रकृति कठिनै र्नाकि मुकुटैः
तटै र्नीहाराद्रेः अधिक मणुना योगि मनसा ।
विभिन्ते संमोहं शिशिरयति भक्तानपि दृशाम्
अदृश्यं कामाक्षि प्रकटयति ते पाद युगलम् ॥ २८॥

पवित्राभ्या मम्ब प्रकृति मृदुलाभ्यां तव शिवे
पदाभ्यां कामाक्षि प्रसभ मभिभूतैः सचकितैः ।
प्रवालै रम्भोजैः अपि च वनवास व्रतदशाः
सदैवारभ्यन्ते परिचरित नानाद्विजगणैः ॥ २९॥

चिरादृश्या हंसैः कथमपि सदा हंस सुलभं
निरस्यन्ती जाड्यं नियत जड मध्यैक शरणम् ।
अदोषव्या सङ्गा सतत मपि दोषाप्ति मलिनं
पयोजं कामाक्ष्याः परिहसति पादाब्ज युगली ॥ ३०॥

सुराणा मानन्द प्रबलन तया मण्डन तया
नखेन्दु ज्योत्स्नाभिः विसृमर तमः खण्डन तया ।
पयोजश्री द्वेष व्रत रत तया त्वच्चरणयोः
विलासः कामाक्षि प्रकटयति नैशाकर दशाम् ॥ ३१॥

सितिम्ना कान्तीनां नखर जनुषां पाद नलिन-
च्छवीनां शोणिम्ना तव जननि कामाक्षि नमने ।
लभन्ते मन्दार ग्रथित नव बन्धूक कुसुम-
स्रजां सामीचीन्यं सुरपुर पुरन्ध्री कचभराः ॥ ३२॥

स्फुरन्मध्ये शुद्धे नखकिरण दुग्धाब्धि पयसां
वहन्नब्जं चक्रं दरमपि च लेखात्मक तया ।
श्रितो मात्स्यं रूपं श्रियमपि दधानो निरुपमां
त्रिधामा कामाक्ष्याः पदनलिन नामा विजयते ॥ ३३॥

नखश्री सन्नद्ध स्तबक निचितः स्वैश्च किरणैः
पिशङ्गैः कामाक्षि प्रकटित लसत् पल्लव रुचिः ।
सतां गम्यः शङ्के सकल फलदाता सुरतरुः
त्वदीयः पादोऽयं तुहिन गिरि राजन्य तनये ॥ ३४॥

वषट्कुर्वन्माञ्जीरज कलकलैः कर्मलहरी-
हवींषि प्रौद्दण्डं ज्वलति परमज्ञान दहने ।
महीयान्कामाक्षि स्फुटमहसि जोहोति सुधियां
मनोवेद्यां मातस्तव चरणयज्वा गिरिसुते ॥ ३५॥

महामन्त्रं किंचित् मणिकटक नादै मृदु जपन्
क्षिपन्दिक्षु स्वच्छं नखरुचि मयं भास्मनरजः ।

नतानां कामाक्षि प्रकृति पटु रुच्चाट्य ममता-
पिशाचीं पादोऽयं प्रकटयति ते मान्त्रिक दशाम् ॥ ३६॥

उदीते बोधेन्दौ तमसि नितरां जग्मुषि दशां
दरिद्रां कामाक्षि प्रकट मनुरागं विदधती ।
सितेनाच्छाद्याङ्गं नखरुचि पटेनाङ्घ्रि युगली-
पुरन्ध्री ते मातः स्वय मभिसरत्येव हृदयम् ॥ ३७॥

दिनारम्भः सम्पन् नलिन विपिनाना मभिनवो
विकासो वासन्तः सुकविपिक लोकस्य नियतः ।
प्रदोषः कामाक्षि प्रकट परमज्ञान शशिनः
चकास्ति त्वत्पाद स्मरण महिमा शैल तनये ॥ ३८॥

धृतच्छायं नित्यं सरसिरुह मैत्री परिचितं
निधानं दीप्तीनां निखिल जगतां बोध जनकम् ।
मुमुक्षूणां मार्ग प्रथन पटु कामाक्षि पदवीं
पदं ते पातङ्गीं परिकलयते पर्वत सुते ॥ ३९॥

शनैस्तीर्त्वा मोहाम्बुधि मथ समारोढु मनसः
क्रमात् कैवल्याख्यां सुकृति सुलभां सौधवलभीम् ।
लभन्ते निःश्रेणी मिव झटिति कामाक्षि चरणं
पुरश्चर्याभिस्ते पुरमथन सीमन्तिनि जनाः ॥ ४०॥

प्रचण्डार्ति क्षोभ प्रमथनकृते प्रातिभ सरित्
प्रवाह प्रोद्दण्डी करण जलदाय प्रणमताम् ।
प्रदीपाय प्रौढे भवत मसि कामाक्षि चरण-
प्रसादौन्मुख्याय स्पृहयति जनोऽयं जननि ते ॥ ४१॥

मरुद्भिः संसेव्या सतत मपि चाञ्चल्य रहिता
सदारुण्यं यान्ती परिणति दरिद्राण सुषमा ।
गुणोत्कर्षान् माञ्जीरज कलकलै स्तर्जन पटुः
प्रवालं कामाक्ष्याः परिहसति पादाब्ज युगली ॥ ४२॥

जगद्रक्षा दक्षा जलज रुचि शिक्षा पटुतरा
समैर्नम्या रम्या सतत मभिगम्या बुधजनैः ।
द्वयी लीलालोला श्रुतिषु सुरपालादि मुकुटी-
तटी सीमाधामा तव जननि कामाक्षि पदयोः ॥ ४३॥

गिरां दूरौ चोरौ जडिम तिमिराणां कृतजगत्
परित्राणौ शोणौ मुनि हृदय लीलैक निपुणौ ।
नखैः स्मेरौ सारौ निगम वचसां खण्डित भव-
ग्रहोन्मादौ पादौ तव जननि कामाक्षि कलये ॥ ४४॥

अविश्रान्तं पङ्कं यदपि कलयन्यावकमयं
निरस्यन्कामाक्षि प्रणमन जुषां पङ्क मखिलम् ।

तुलाकोटि द्वन्दं दधदपि च गच्छ न्नतुलतां
गिरां मार्गं पादो गिरिवर सुते लङ्घयति ते ॥ ४५॥

प्रवालं सव्रीलं विपिन विवरे वेपयति या
स्फुरल्लीलं बाला तप मधिक बालं वदति या ।
रुचिं सान्ध्यां वन्ध्यां विरचयति या वर्धयतु सा
शिवं मे कामाक्ष्याः पद नलिन पाटल्य लहरी ॥ ४६॥

किरञ्ज्योत्स्ना रीतिं नख मुखरुचा हंस मनसां
वितन्वानः प्रीतिं विकच तरुणाम्भोरुह रुचिः ।
प्रकाशः श्रीपादस्तव जननि कामाक्षि तनुते
शरत्काल प्रौढिं शशि शकल चूड प्रियतमे ॥ ४७॥

नखाङ्कूर स्मेर द्युति विमल गङ्गाम्भसि सुखं
कृतस्नानं ज्ञाना मृत ममल मास्वाद्य नियतम् ।
उदञ्चन्मञ्जीर स्फुरण मणिदीपे मम मनो
मनोज्ञे कामाक्ष्याः चरण मणिहर्म्ये विहरताम् ॥ ४८॥

भवाम्भोधौ नौकां जडिम विपिने पावक शिखा-
ममर्त्येन्द्रादीनां अधिमुकुट मुत्तंस कलिकाम् ।
जगत्तापे ज्योत्स्नां अकृतकवचः पञ्जर पुटे
शुकस्त्रीं कामाक्ष्या मनसि कलये पाद युगलीम् ॥ ४९॥

परात्म प्राकाश्य प्रतिफलन चुञ्चुः प्रणमतां
मनोज्ञ स्त्वत्पादो मणिमुकुर मुद्रां कलयते ।
यदीयां कामाक्षि प्रकृति मसृणाः शोधक दशां
विधातुं चेष्टन्ते बल रिपु वधूटी कचभराः ॥ ५०॥

अविश्रान्तं तिष्ठन् अकृत कवचः कन्दर पुटी-
कुटीरान्तः प्रौढं नखरुचि सटालीं प्रकटयन् ।
प्रचण्डं खण्डत्वं नयतु मम कामाक्षि तरसा
तमो वेतण्डेन्द्रं तव चरण कण्ठीरव पतिः ॥ ५१॥

पुरस्तात्कामाक्षि प्रचुर रस माखण्डल पुरी-
पुरन्ध्रीणां लास्यं तव ललित मालोक्य शनकैः ।
नखश्रीभिः स्मेरा बहु वितनुते नूपुररवैः
चमत्कृत्या शङ्के चरण युगली चाटु रचनाः ॥ ५२॥

सरोजं निन्दन्ती नखकिरण कर्पूर शिशिरा
निषिक्ता मारारे र्मुकुट शशिरेखा हिमजलैः ।
स्फुरन्ती कामाक्षि स्फुटरुचि मये पल्लवचये
तवाधत्ते मैत्रीं पथिक सुदृशा पाद युगली ॥ ५३॥

नतानां सम्पत्तेः अनवरत माकर्षण जपः
प्ररोहत्संसार प्रसर गरिम स्तम्भन जपः ।

त्वदीयः कामाक्षि स्मरहर मनो मोहन जपः
पटीयान्नः पायात् पद नलिन मञ्जीर निनदः ॥ ५४॥

वितन्वीथा नाथे मम शिरसि कामाक्षि कृपया
पदाम्भोज न्यासं पशु परिबृढ प्राण दयिते ।
पिबन्तो यन्मुद्रां प्रकट मुपकम्पा परिसरं
दृशा नानन्द्यन्ते नलिन भव नारायण मुखाः ॥ ५५॥

प्रणामोद्यद्बृन्दारक मुकुट मन्दार कलिका-
विलोल ल्लोलम्ब प्रकरमय धूम प्रचुरिमा ।
प्रदीप्तः पादाब्ज द्युति वितति पाटल्य लहरी-
कृशानुः कामाक्ष्या मम दहतु संसार विपिनम् ॥ ५६॥

वलक्ष श्रीर्ऋक्षाधिप शिशु सदृक्षै स्तव नखैः
जिघृक्षु र्दक्षत्वं सरसिरुह भिक्षुत्व करणे ।
क्षणान्मे कामाक्षि क्षपित भव संक्षोभ गरिमा
वचो वैचक्षन्यं चरण युगली पक्ष्मलयतात् ॥ ५७॥

समन्तात्कामाक्षि क्षत तिमिर सन्तान सुभगान्
अनन्ताभि र्भाभिः दिनमनु दिगन्तान्विरचयन् ।
अहन्ताया हन्ता मम जडिम दन्तावल हरिः
विभिन्तां सन्तापं तव चरण चिन्तामणि रसौ ॥ ५८॥

दधानो भास्वत्तां अमृत निलयो लोहित वपुः
विनम्राणां सौम्यो गुरुरपि कवित्वं च कलयन् ।
गतौ मन्दो गङ्गाधर महिषि कामाक्षि भजतां
तमःकेतुर्मातः तव चरण पद्मो विजयते ॥ ५९॥

नयन्तीं दासत्वं नलिन भव मुख्या नसुलभ-
प्रदानाद्दीनानां अमरतरु दौर्भाग्य जननीम् ।
जगज्जन्म क्षेम क्षय विधिषु कामाक्षि पदयोः
धुरीणामीष्टे कस्तव भणितुमाहो पुरुषिकाम् ॥ ६०॥

जनोऽयं सन्तप्तो जननि भव चण्डांशु किरणैः
अलब्ध्वैकं शीतं कणमपि परज्ञान पयसः ।
तमोमार्गे पान्थस्तव झटिति कामाक्षि शिशिरां
पदाम्भोज च्छायां परमशिव जाये मृगयते ॥ ६१॥

जयत्यम्ब श्रीमन् नख किरण चीनांशुक मयं
वितानं बिभ्राणे सुरमुकुट संघट्ट मसृणे ।
निजारुण्य क्षौमास्तरणवति कामाक्षि सुलभा
बुधैः संविन्नारी तव चरण माणिक्य भवने ॥ ६२॥

प्रतीमः कामाक्षि स्फुरित तरुणादित्य किरण-
श्रियो मूलद्रव्यं तव चरण मद्रीन्द्र तनये ।

सुरेन्द्राशा मापूरयति यदसौ ध्वान्त मखिलं
धुनीते दिग्भागा नपि च महसा पाटलयते ॥ ६३॥

महाभाष्य व्याख्या पटु शयन मारोपयति वा
स्मर व्यापारेर्ष्या पिशुन निटिलं कारयति वा ।
द्विरेफाणा मध्यासयति सततं वाधिवसतिं
प्रणम्रान्कामाक्ष्याः पदनलिन माहात्म्य गरिमा ॥ ६४॥

विवेकाम्भ स्स्रोत स्स्नपन परिपाटी शिशिरिते
समीभूते शास्त्र स्मरण हल संकर्षण वशात् ।
सतां चेतःक्षेत्रे वपति तव कामाक्षि चरणो
महासंवित्सस्य प्रकर वर बीजं गिरिसुते ॥ ६५॥

दधानो मन्दार स्तबक परिपाटीं नखरुचा
वहन्दीप्तां शोणाङ्गुलि पटल चाम्पेय कलिकाम् ।
अशोकोल्लासं नः प्रचुरयतु कामाक्षि चरणो
विकासी वासन्तः समय इव ते शर्वदयिते ॥ ६६॥

नखांशु प्राचुर्य प्रसृमर मरालालि धवलः
स्फुरन्मञ्जीरोद्य न्मरकत महश्शैवल युतः ।
भवत्याः कामाक्षि स्फुट चरण पाटल्य कपटो
नदः शोणाभिख्यो नगपति तनूजे विजयते ॥ ६७॥

धुनानं पङ्कौघं परम सुलभं कण्टक कुलैः
विकास व्यासङ्गं विदध दपराधीन मनिशम् ।
नखेन्दु ज्योत्स्नाभि र्विशद रुचि कामाक्षि नितराम्
असामान्यं मन्ये सरसिज मिदं ते पदयुगम् ॥ ६८॥

करीन्द्राय द्रुह्यति अलस गति लीलासु विमलैः
पयोजै र्मात्सर्यं प्रकटयति कामं कलयते ।
पदाम्भोज द्वन्द्वं तव तदपि कामाक्षि हृदयं
मुनीनां शान्तानां कथमनिश मस्मै स्पृहयते ॥ ६९॥

निरस्ता शोणिम्ना चरण किरणानां तव शिवे
समिन्धाना सन्ध्या रुचि रचल राजन्य तनये ।
असामर्थ्या देनं परिभवितु मेतत्समरुचां
सरोजानां जाने मुकुलयति शोभां प्रतिदिनम् ॥ ७०॥

उपादिक्ष द्दाक्ष्यं तव चरण नामा गुरुरसौ
मरालानां शङ्के मसृण गति लालित्य सरणौ ।
अतस्ते निस्तन्द्रं नियत ममुना सख्य पदवीं
प्रपन्नं पाथोजं प्रति दधति कामाक्षि कुतुकम् ॥ ७१॥

दधानैः संसर्गं प्रकृति मलिनैः षट्पद कुलैः
द्विजाधीश श्लाघा विधिषु विदधद्भि र्मुकुलताम् ।

रजोमिश्रैः पद्मै र्नियत मपि कामाक्षि पदयोः
विरोधस्ते युक्तो विषमशर वैरि प्रियतमे ॥ ७२॥

कवित्वश्री मिश्री करण निपुणौ रक्षण चणौ
विपन्नानां श्रीमन्नलिन मसृणौ शोण किरणौ ।
मुनीन्द्राणा मन्तःकरण शरणौ मन्द सरणौ
मनोज्ञौ कामाक्ष्या दुरित हरणौ नौमि चरणौ ॥ ७३॥

परस्मात्सर्वस्मा दपि च परयो र्मुक्ति करयोः
नखश्रीभि र्ज्योत्स्ना कलित तुलयो स्ताम्र तलयोः ।
निलीये कामाक्ष्या निगम नुतयो र्नाकि नतयोः
निरस्त प्रोन्मील न्नलिन मदयो रेव पदयोः ॥ ७४॥

स्वभावा दन्योन्यं किसलय मपीदं तव पदं
म्रदिम्ना शोणिम्ना भगवति दधाते सदृशताम् ।
वने पूर्वस्येच्छा सतत मवने किं तु जगतां
परस्येत्थं भेदः स्फुरति हृदि कामाक्षि सुधियाम् ॥ ७५॥

कथं वाचालोऽपि प्रकट मणि मञ्जीर निनदैः
सदै वानन्दार्द्रान् विरचयति वाचंयमजनान् ।
प्रकृत्या ते शोणच्छविरपि च कामाक्षि चरणो
मनीषा नैर्मल्यं कथमिव नृणां मांसलयते ॥ ७६॥

चलत्तृष्णा वीची परिचलन पर्याकुल तया
मुहुर्भ्रान्त स्तान्तः परमशिव वामाक्षि परवान् ।
तितीर्षुः कामाक्षि प्रचुरतर कर्माम्बुधि ममुं
कदाहं लप्स्ये ते चरण मणि सेतुं गिरिसुते ॥ ७७॥

विशुष्यन्त्यां प्रज्ञा सरिति दुरित ग्रीष्म समय-
प्रभावेण क्षीणे सति मम मनःकेकिनि शुचा ।
त्वदीयः कामाक्षि स्फुरित चरणाम्भोद महिमा
नभोमा साटोपं नगपतिसुते किं न कुरुते ॥ ७८॥

विनम्राणां चेतो भवन वलभी सीम्नि चरण-
प्रदीपे प्राकाश्यं दधति तव निर्धूत तमसि ।
असीमा कामाक्षि स्वय मलघु दुष्कर्म लहरी
विघूर्णन्ती शान्तिं शलभ परिपाटीव भजते ॥ ७९॥

विराजन्ती शुक्ति र्नख किरण मुक्तामणि ततेः
विपत्पाथो राशौ तरिरपि नराणां प्रणमताम् ।
त्वदीयः कामाक्षि ध्रुव मलघु वह्नि र्भव वने
मुनीनां ज्ञानाग्नेः अरणिरय मंघ्रि र्विजयते ॥ ८०॥

समस्तैः संसेव्यः सततमपि कामाक्षि विबुधैः
स्तुतो गन्धर्व स्त्री सुललित विपञ्ची कलरवैः ।

भवत्या भिन्दानो भवगिरि कुलं जृम्भित तमो-
बलद्रोही मातः चरण पुरुहूतो विजयते ॥ ८१॥

वसन्तं भक्तानां अपि मनसि नित्यं परिलसद्-
घनच्छा यापूर्णं शुचिमपि नृणां ताप शमनम् ।
नखेन्दु ज्योत्स्नाभिः शिशिर मपि पद्मोदय करं
नमामः कामाक्ष्याः चरण मधिकाश्चर्य करणम् ॥ ८२॥

कवीन्द्राणां नानाभणिति गुण चित्रीकृत वचः-
प्रपञ्च व्यापार प्रकटन कला कौशल निधिः ।
अधःकुर्वन्नब्जं सनक भृगु मुख्यै र्मुनिजनैः
नमस्यः कामाक्ष्याः चरण परमेष्ठी विजयते ॥ ८३॥

भवत्याः कामाक्षि स्फुरित पद पङ्केरुह भुवां
परागाणां पूरैः परिहृत कलङ्क व्यतिकरैः ।
नताना मामृष्टे हृदय मुकुरे निर्मल रुचि
प्रसन्ने निश्शेषं प्रतिफलति विश्वं गिरिसुते ॥ ८४॥

तव त्रस्तं पादात् किसलय मरण्यान्तर मगात्
परं रेखारूपं कमल ममुमे वाश्रित मभूत् ।
जितानां कामाक्षि द्वितय मपि युक्तं परिभवे
विदेशे वासो वा शरण गमनं वा निजरिपोः ॥ ८५॥

गृहीत्वा याथार्थ्यं निगम वचसां देशिक कृपा-
कटाक्षर्क ज्योति श्शमित ममता बन्ध तमसः ।
यतन्ते कामाक्षि प्रतिदिवस मन्त द्र्रढयितुं
त्वदीयं पादाब्जं सुकृत परिपाकेन सुजनाः ॥ ८६॥

जडानाम प्यम्ब स्मरण समये तवच्चरणयोः
भ्रमन्मन्थ क्ष्माभृद् घुमुघुमित सिन्धु प्रतिभटाः ।
प्रसन्नाः कामाक्षि प्रसभ मधर स्पन्दन करा
भवन्ति स्वच्छन्दं प्रकृति परिपक्का भणितयः ॥ ८७॥

वहन्नप्यश्रान्तं मधुर निनदं हंसक मसौ
तमेवाधः कर्तुं किमिव यतते केलि गमने ।
भवस्यै वानन्दं विदध दपि कामाक्षि चरणो
भवत्या स्तद्द्रोहं भगवति किमेवं वितनुते ॥ ८८॥

यदत्यन्तं ताम्यति अलसगति वार्ता स्वपि शिवे
तदेतत्कामाक्षि प्रकृति मृदुलं ते पदयुगम् ।
किरीटैः संघट्टं कथमिव सुरौघस्य सहते
मुनीन्द्राणा मास्ते मनसि च कथं सूचि निशिते ॥ ८९॥

मनोरङ्गे मत्के विबुध जन संमोद जननी
सराग व्यासङ्गं सरस मृदु संचार सुभगा ।

मनोज्ञा कामाक्षि प्रकटयतु लास्य प्रकरणं
रणन्मञ्जीरा ते चरण युगली नर्तक वधूः ॥ ९०॥

परिष्कुर्वन्मातः पशुपति कपर्दं चरणराट्
पराचां हृत्पद्मं परम भणितीनां च मकुटम् ।
भवाख्ये पाथोधौ परिहरतु कामाक्षि ममता-
पराधीनत्वं मे परिमुषित पाथोज महिमा ॥ ९१॥

प्रसूनैः सम्पर्कात् अमर तरुणी कुन्तल भवैः
अभीष्टानां दानात् अनिशमपि कामाक्षि नमताम् ।
स्वसङ्गात्कङ्केलि प्रसव जनकत्वेन च शिवे
त्रिधा धत्ते वार्तां सुरभि रिति पादो गिरिसुते ॥ ९२॥

महामोहस्तेन व्यतिकर भया त्पालयति यो
विनिक्षिप्तं स्वस्मि न्निजजन मनोरत्न मनिशम् ।
स रागस्यो द्रेका त्सतत मपि कामाक्षि तरसा
किमेवं पादोऽसौ किसलय रुचिं चोरयति ते ॥ ९३॥

सदा स्वादुंकारं विषय लहरी शालि कणिकां
समास्वाद्य श्रान्तं हृदय शुक पोतं जननि मे ।
कृपाजाले फालेक्षण महिषि कामाक्षि रभसात्
गृहीत्वा रुन्धीथाः तव पदयुगी पञ्जर पुटे ॥ ९४॥

धुनानं कामाक्षि स्मरण लव मात्रेण जडिम-
ज्वरप्रौढिं गूढ स्थिति निगम नैकुञ्ज कुहरे ।
अलभ्यं सर्वेषां कतिचन लभन्ते सुकृतिनः
चिरा दन्विष्यन्त स्तव चरण सिद्धौषध मिदम् ॥ ९५॥

रणन्मञ्जीराभ्यां ललित गमनाभ्यां सुकृतिनां
मनो वास्तव्याभ्यां मथित तिमिराभ्यां नखरुचा ।
निधेयाभ्यां पत्या निज शिरसि कामाक्षि सततं
नमस्ते पादाभ्यां नलिन मृदुलाभ्यां गिरिसुते ॥ ९६॥

सुरागे राकेन्दु प्रतिनिधि मुखे पर्वतसुते
चिराल्लभ्ये भक्त्या शमधन जनानां परिषदा ।
मनोभृङ्गो मत्कः पदकमल युग्मे जननि ते
प्रकामं कामाक्षि त्रिपुरहर वामाक्षि रमताम् ॥ ९७॥

शिवे संविद्रूपे शशि शकल चूड प्रियतमे
शनैर्गत्या गत्या जितसुर वरेभे गिरिसुते ।
यतन्ते सन्तस्ते चरण नलिनालान युगले
सदा बद्धं चित्त प्रमद करियूथं दृढतरम् ॥ ९८॥

यशः सूते मात र्मधुर कवितां पक्ष्मलयते
श्रियं दत्ते चित्ते कमपि परिपाकं प्रथयते ।

सतां पाशग्रन्थिं शिथिलयति किं किं न कुरुते
प्रपन्ने कामाक्ष्याः प्रणति परिपाटी चरणयोः ॥ ९९॥

मनीषां माहेन्द्रीं ककुभमिव ते कामपि दशां
प्रधत्ते कामाक्ष्याः चरण तरुणादित्य किरणः ।
यदीये सम्पर्के धृतरस मरन्दा कवयतां
परीपाकं धत्ते परिमलवती सूक्ति नलिनी ॥ १००॥

पुरा मारारातिः पुरमजय दम्ब स्तवशतैः
प्रसन्नायां सत्यां त्वयि तुहिन शैलेन्द्र तनये ।
अतस्ते कामाक्षि स्फुरतु तरसा काल समये
समायाते मात र्मम मनसि पादाब्ज युगलम् ॥ १०१॥

पदद्वन्द्वं मन्दं गतिषु निवसन्तं हृदि सतां
गिरामन्ते भ्रान्तं कृतकर हितानां परिबृढे ।
जनाना मानन्दं जननि जनयन्तं प्रणमतां
त्वदीयं कामाक्षि प्रतिदिन महं नौमि विमलम् ॥ १०२॥

इदं यः कामाक्ष्याः चरण नलिन स्तोत्र शतकं
जपेन्नित्यं भक्त्या निखिल जगदा ह्लाद जनकम् ।
स विश्वेषां वन्द्यः सकल कविलोकैक तिलकः
चिरं भुक्त्वा भोगान् परिणमति चिद्रूप कलया ॥ १०३॥

पादारविन्द शतकं सम्पूर्णम् ॥